# नीतिमुक्तावलिः

संस्कृतसाहित्ये नीतिरत्नानां प्रचुरं भण्डारमस्ति। संस्कृतग्रन्थेषु राजनीतिसदाचारादर्शादीनां शिक्षा उपलभ्यते। मानवजीवने नीतिवाक्यानाम् अहर्निशम् आवश्यकता भवति। जीवनस्य आधारो नीतिः अप्यस्ति।

अतः छात्राणां कृते नीतिसदाचारव्यवहारज्ञानार्थं विविधग्रन्थेभ्यः सङ्कलिताः श्लोकाः अत्र प्रस्तुताः सन्ति।

## केन किं रक्ष्यते

*सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते।*
*मृजया रक्ष्यते पात्रं, कुलं शीलेन रक्ष्यते ॥1॥*

**अन्वयः** - धर्मः सत्येन रक्ष्यते, विद्या योगेन रक्ष्यते, पात्रं मृजया रक्ष्यते, कुलं शीलेन रक्ष्यते।

**शब्दार्थः** -

| | | |
|---|---|---|
| मृजया | - | मार्जनेन |
| कुलम् | - | कुटुम्बम् |
| शीलेन | - | सदाचारेण |
| पात्रम् | - | भाजनम् |

## पितृसेवा

*पितृमातृसमं लोके नास्त्यन्यद् दैवतं परम्।*
*तस्मात् सर्वप्रयत्नेन पूजयेत् पितरौ सदा ॥2॥*

**अन्वयः** - लोके पितृमातृसमम् अन्यत् परं दैवतं नास्ति। तस्मात् सर्वप्रयत्नेन सदा पितरौ पूजयेत्।

**शब्दार्थः** -

| | | |
|---|---|---|
| लोके | - | संसारे |
| अन्यत् | - | किमपि |
| परम् | - | श्रेष्ठम् |
| दैवतम् | - | देवः |
| पितरौ | - | मातरं पितरं च |

## उद्यमः

*यावत् स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो,*
*यावच्चेन्द्रियशक्तिरप्रतिहता यावत् क्षयो नायुषः ।*
*आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्*
*संदीप्ते भवने हि कूपखननं प्रत्युद्यमः कीदृशः ॥3॥*

**अन्वयः** - यावत् इदम् अरुजं शरीरं स्वस्थं यावत् जरा दूरतः, यावत् च इन्द्रियशक्तिः अप्रतिहता यावत् आयुषः क्षयः न, तावत् एव विदुषा आत्मश्रेयसि महान् प्रयत्नः कार्यः। भवने संदीप्ते हि कूपखननं प्रति उद्यमः कीदृशः।

**शब्दार्थः** -

| | | |
|---|---|---|
| अरुजम् | - | रोगरहितम् (निरोग) |
| संदीप्ते | - | दग्धे जाते (जला हुआ) |
| उद्यमः | - | परिश्रमः |
| विदुषा | - | प्राज्ञेन (बुद्धि के द्वारा) |

## सन्तोषः

*अन्तो नास्ति पिपासायाः, सन्तोषः परमं सुखम् ।*
*तस्मात्सन्तोषमेवेह परं पश्यन्ति पण्डिताः ॥4॥*

**अन्वयः** - पिपासायाः अन्तः न अस्ति, सन्तोषः परमं सुखम्। तस्मात् इह पण्डिताः सन्तोषम् एव परं पश्यन्ति।

**शब्दार्थः** -

| | | |
|---|---|---|
| पिपासायाः | - | तृष्णायाः/पातुमिच्छायाः |

## सद्गुणमहत्त्वम्

*क्षमया दयया प्रेम्णा सूनृतेनार्जवेन च ।*
*वशीकुर्याज्जगत् सर्वं विनयेन च सेवया ॥5॥*

**अन्वयः** - सर्वं जगत् क्षमया दयया प्रेम्णा सूनृतेन, आर्जवेन विनयेन सेवया च वशीकुर्यात्।

**शब्दार्थः** -

| | | |
|---|---|---|
| सूनृतेन | - | सत्यभाषणेन |
| आर्जवेन | - | सरलतया |
| विनयेन | - | विनम्रतया |

## यमाः

*सत्यं क्षमाऽऽर्जवं ध्यानमानृशंस्यमहिंसनम् ।*
*दमः प्रसादो माधुर्यं मृदुतेति यमा दश ॥6॥*

**अन्वयः** - सत्यं क्षमा आर्जवं ध्यानम् आनृशंस्यम् अहिंसनम्, दमः प्रसादः माधुर्यं मृदुता इति दश यमाः।

**शब्दार्थः** -

| | | |
|---|---|---|
| आर्जवम् | - | सारल्यम् |
| आनृशंस्यम् | - | क्रूरताराहित्यम् |
| मृदुता | - | कोमलता |
| अहिंसनम् | - | हिंसाराहित्यम् |

## नियमाः

*शौचं स्नानं तपो दानं मौनेज्याध्ययनं व्रतम् ।*

*उपोषणोपस्थदण्डौ दशैते नियमाः स्मृताः ॥7॥*

**अन्वयः** - शौचं स्नानं तपो दानं, मौनेज्याध्ययनं, व्रतम् उपोषणोपस्थदण्डौ एते दश नियमाः स्मृताः ।

| | | |
|---|---|---|
| **शब्दार्थः** - इज्या | - | यजनम्, यज्ञम् |
| उपोषणम् | - | उपवासः |
| उपस्थदण्डः | - | इन्द्रियनिग्रहः |

## तेजस्विताप्रशंसा

*सिंह शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु ।*

*प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसां हेतुः ॥8॥*

**अन्वयः** - सिंहशिशुः अपि मदमलिनकपोलभित्तिषु गजेषु निपतति । सत्त्ववताम् इयं प्रकृतिः खलु वयः तेजसां हेतुः न ।

| | | |
|---|---|---|
| **शब्दार्थः** - सिंहशिशुः | - | सिंहशावकः |
| मदमलिनकपोलभित्तिषु | - | मदजलमलिनगण्डस्थलेषु |
| सत्त्ववताम् | - | बलवताम् |
| प्रकृतिः | - | स्वभावः |
| वयः | - | आयुः |
| हेतुः | - | कारणम् |
| निपतति | - | आक्रमणं करोति |

## पातकक्षालनम्

*विद्यातीर्थे जगति विबुधाः साधवः सत्यतीर्थे,*

*गङ्गातीर्थे मलिनमनसो, योगिनो ध्यानतीर्थे ।*

*धरातीर्थे धरणिपतयो दानतीर्थे धनाढ्याः,*

*लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ते ॥9॥*

**अन्वयः** - जगति विबुधाः विद्यातीर्थे, साधवः सत्यतीर्थे, मलिनमनसः गङ्गातीर्थे, योगिनः ध्यानतीर्थे, धरणिपतयः धरातीर्थे, धनाढ्याः दानतीर्थे कुलयुवतयः लज्जातीर्थे पातकं क्षालयन्ते ।

| | | |
|---|---|---|
| **शब्दार्थः** - जगति | - | संसारे |
| धरणिपतयः | - | भूपालाः |
| क्षालयन्ते | - | परिमार्जनं कुर्वन्ति |

## अभ्यास:

**1. एकपदेन उत्तरत –**

(क) क: सत्येन रक्ष्यते ?

(ख) कुलं केन रक्ष्यते ?

(ग) सर्वप्रयत्नेन कौ पूज्यौ ?

(घ) कस्या: अन्तं नास्ति ?

(ङ) धरणिपतय: कुत्र पातकं प्रक्षालयन्ते ?

**2. एकवाक्येन उत्तरत –**

(क) विद्या केन रक्ष्यते ?

(ख) पण्डिता: किं परं पश्यन्ति ?

(ग) विनयेन सेवया च कं वशीकुर्यात् ?

(घ) मातृपितृसमम् अन्यत् किं नास्ति ?

(ङ) किं परमं सुखम् ?

**3. त्रिचतुर्भिर्वाक्यै: उत्तरत –**

(क) यमा: कति सन्ति, तेषां नामानि लिखत ?

(ख) विदुषा आत्मश्रेयसि कदा प्रभृति प्रयत्न: कार्य: ?

(ग) के नियमा: ?

(घ) पातकप्रक्षालनाय कानि तीर्थानि वर्णितानि ?

**4. रिक्तस्थानानि पूरयत –**

(क) .................................. परं सन्तोषम् एव पश्यन्ति।

(ख) जगत्सर्वं वशीकुर्यात् .................................... ।

(ग) ................................. नियमा: स्मृता:।

(घ) न खलु .......................................... हेतु:।

(ङ) लज्जातीर्थे कुलयुवतय: ................................ ।

(च) संदीप्ते भवने हि कूपखननं ............................... कीदृश:।

**5. युग्ममेलनं कुरुत –**

| 'अ' | 'आ' |
|---|---|
| (क) धर्म: रक्ष्यते | वशीकुर्यात् |
| (ख) पिपासाया: | सत्येन |
| (ग) जगत्सर्वं विनयेन | दानतीर्थे |
| (घ) दश | अन्तो नास्ति |
| (ङ) धनाढ्या: पातकं क्षालयन्ते | यमा: |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

| | | |
|---|---|---|
| यथा - | पिपासाया: अन्तो नास्ति | आम् |
| | नियमा: पञ्च | न |
| (क) | धरणिपतयो पातकं दानतीर्थे क्षालयन्ते। | |
| (ख) | सन्तोष: परमं सुखम्। | |
| (ग) | साधव: पातकं सत्यतीर्थे क्षालयन्ते। | |
| (घ) | धर्म: योगेन रक्ष्यते। | |
| (ङ) | पूजयेत् पितरौ सदा | |

7. **अधोलिखितपदानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| पदम् | मूलशब्द: | विभक्ति: | वचनम् |
|---|---|---|---|
| पिपासाया: | | | |
| दयया | | | |
| विनयेन | | | |
| गजेषु | | | |
| तीर्थे | | | |
| युवतय: | | | |
| जगति | | | |
| विदुषा | | | |

8. **नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत -**

(क) सदाचारेण

(ख) दशैते

(ग) शिशुरपि

(घ) प्रकृतिरियम्

(ङ) प्रत्युद्यम:

9. **नामोल्लेखपूर्वकं समासविग्रहं कुरुत -**

(क) पितरौ

(ख) विद्यातीर्थ:

(ग) मदमलिन:

(घ) यमनियमौ

10. **'नीतिशिक्षा' इति विषये संस्कृतभाषायां निबन्धं लिखत -**

**योग्यताविस्तार: -**

- पाठे आगतान् नीतिश्लोकान् कण्ठस्थं कुरुत।
- नीतिश्लोकानां सङ्ग्रहं कुरुत।